# Shriramasahasranamastotram

# શ્રીરામસહસ્રનામસ્તોત્રં અનન્તસુતશ્રીદિવાકરવિરચિતમ્

## Document Information

Text title : RamasahasranAmastotram 2 by D. A. Ghaisas

File name : rAmasahasranAmastotradivAkaraghaisAsa.itx

Category : sahasranAma, raama

Location : doc_raama

Author : Pandit Divakar Anant Ghaisas

Source : Vishnustutimanjari and Brihatstotraratnakara Dhavele Prakashan

Latest update : May 29, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 2, 2020

*sanskritdocuments.org*

# શ્રીરામસહસ્રનામસ્તોત્રં અનન્તસુતશ્રીદિવાકરવિરચિતમ્

અનન્તસુતશ્રીદિવાકરધૈસાસશાસ્ત્રિવિરચિતં

પ્રજ્ઞાગોદાવરીતીરે ચેતઃપર્ણકુટીકૃતે ।
વૈદેહીશક્તિસંયુક્તં તપસ્યાલક્ષ્મણદ્વયમ્ ॥

પઞ્ચેન્દ્રિયપઞ્ચવટીનિવાસસ્થં ધનુર્ધરમ્ ।
ધ્યાયામ્યાત્મસ્વરૂપં તં રાઘવં ભયનાશનમ્ ॥

વાલ્મીકિ-ભરદ્વાજ-દિવાકરાઃ ઋષયઃ, અનુષ્ટુપ્ છન્દઃ,
શ્રીરામચન્દ્રો દેવતા ।
પ્રાતર્ધ્યેયઃ સદાભદ્રો ભયભઞ્જનકોવિદઃ ઇતિ બીજમ્ ।
સૂક્ષ્મબુદ્ધિર્મહાતેજા અનાસક્તઃ પ્રિયાહવઃ ઇતિ શક્તિઃ ।
વર્ધિષ્ણુર્વિજયી પ્રાજ્ઞો રહસ્યજ્ઞો વિમર્શવિદિતિ કીલકમ્ ।
શ્રીરામસહસ્રનામસ્તોત્રસ્ય જપે વિનિયોગઃ ।

કદાચિત્પૂર્ણસઙ્કલ્પો વાલ્મીકિકવિરાત્મવાન્।
ધ્યાયન્ રામમુપાવિષ્ટઃ સ્વાશ્રમે શાન્તચેતસા ॥ ૧॥

અભિગમ્ય ભરદ્વાજસ્તમુવાચાદરેણ ભોઃ ।
શ્રુતં દૃષ્ટં ચ ચરિતં રામચન્દ્રસ્ય પાવનમ્ ॥ ૨॥

લલિતં વિસ્તરં સૌમ્યં કારુણ્યમધુરં શુભમ્ ।
સ્મૃત્વા સ્વાનન્દભરિતં હૃદયં મે ભવત્યહો ॥ ૩॥

તત્તથા પ્રાકૃતૈર્લોકૈર્યથા સાઙ્ગં ન ગીયતે ।
કલૌ સ્વલ્પાત્મધૈર્યેભ્યો દુરાપસ્તં વિશેષતઃ ॥ ૪॥

ભવાન્ પ્રાતિભવિદ્યાયાં પ્રવીણઃ પરમાર્થતઃ ।
તદ્બ્રવીતુ હિ રામસ્ય સઙ્ક્ષેપેણ મહાગુણાન્ ॥ ૫॥

કિં નિત્યં પઠનીયં કિં સ્વલ્પસારૈર્જનૈઃ શ્રુતમ્ ।

ભવેત્કલ્યાણકૃલ્લોકે પ્રેરણાદાયકં તથા ॥ ૬॥

તચ્છ્રુત્વા સાદરં વાક્યં વાલ્મીકિકવિરબ્રવીત્ ।
શ‍ૃણુ નામાનિ રામસ્ય સહસ્રાણિ યથાક્રમમ્ ॥ ૭॥

સ્તોત્રમેતત્પઠિત્વા હિ ભક્તો જ્ઞાસ્યતિ સર્વથા ।
રાઘવસ્ય ગુણાન્ મુખ્યાન્ ધ્યાત્વા શાન્તિં નિગચ્છતિ ॥ ૮॥

અથ સ્તોત્રમ્ ।
ॐ આર્યશ્રેષ્ઠો ધરાપાલઃ સાકેતપુરપાલકઃ ।
એકબાણો ધર્મવેત્તા સત્યસન્ધોઽપરાજિતઃ ॥ ૧॥

ઇક્ષ્વાકુકુલસમ્ભૂતો રઘુનાથઃ સદાશ્રયઃ ।
અઘધ્વંસી મહાપુણ્યો મનસ્વી મોહનાશનઃ ॥ ૨॥

અપ્રમેયો મહાભાગઃ સીતાસૌન્દર્યવર્ધનઃ ।
અહલ્યોદ્ધારકઃ શાસ્તા કુલદીપઃ પ્રભાકરઃ ॥ ૩॥

આપદ્વિનાશી ગુહ્યજ્ઞઃ સીતાવિરહવ્યાકુલઃ ।
અન્તર્જ્ઞાની મહાજ્ઞાની શુદ્ધસઞ્જ્ઞોઽનુજપ્રિયઃ ॥ ૪॥

અસાધ્યસાધકો ભીમો મિતભાષી વિદાં વરઃ ।
અવતીર્ણઃ સમુત્તારો દશસ્યન્દનમાનદઃ ॥ ૫॥

આત્મારામો વિમાનાર્હો હર્ષામર્ષસુસઙ્ગતઃ ।
અભિગમ્યો વિશાલાત્મા વિરામશ્ચિન્તનાત્મકઃ ॥ ૬॥

અદ્વિતીયો મહાયોગી સાધુચેતાઃ પ્રસાદનઃ ।
ઉગ્રશ્રીરન્તકસ્તેજસ્તારણો ભૂરિસઙ્ગ્રહઃ ॥ ૭॥

એકદારઃ સત્ત્વનિધિઃ સન્નિધિઃ સ્મૃતિરૂપવાન્ ।
ઉત્તમાલઙ્કૃતઃ કર્તા ઉપમારહિતઃ કૃતી ॥ ૮॥

આજાનુબાહુરક્ષુબ્ધઃ ક્ષુબ્ધસાગરદર્પહા ।
આદિત્યકુલસન્તાનો વંશોચિતપરાક્રમઃ ॥ ૯॥

અનુકૂલઃ સતાં સદ્ભિર્ભાવબદ્ધકરૈઃ સ્તુતઃ ।
ઉપદેષ્ટા નૃપોત્કૃષ્ટો ભૂજામાતા ખગપ્રિયઃ ॥ ૧૦॥

ઓજોરાશિર્નિધિઃ સાક્ષાત્ક્ષણદૃષ્ટાત્મચેતનઃ ।
ઉમાપરીક્ષિતો મૂકઃ સન્ધિજ્ઞો રાવણાન્તકઃ ॥ ૧૧॥

અલૌકિકો લોકપાલસ્ત્રૈલોક્યવ્યાપ્તવૈભવઃ ।
અનુજાશ્વાસિતઃ શિષ્ટો વરિષ્ઠશ્ચાપધારિષુ ॥ ૧૨॥

ઉદ્યમી બુદ્ધિમાન્ ગુપ્તો યુયુત્સુઃ સર્વદર્શનઃ ।
ઐક્ષ્વાકો લક્ષ્મણપ્રાણો લક્ષ્મીવાન્ ભાર્ગવપ્રિયઃ ॥ ૧૩॥

ઇષ્ટદઃ સત્યદિદૃક્ષુર્દિગ્જયી દક્ષિણાયનઃ ।
અનન્યવૃત્તિરુદ્યોગી ચન્દ્રશેખરશાન્તિદઃ ॥ ૧૪॥

અનુજાર્થસમુત્કણ્ઠઃ સુરત્રાણઃ સુરાકૃતિઃ ।
અશ્વમેધી યશોવૃદ્ધસ્તરુણસ્તારણેક્ષણઃ ॥ ૧૫॥

અપ્રાકૃતઃ પ્રતિજ્ઞાતા વરપ્રાપ્તો વરપ્રદઃ ।
અભૂતપૂર્વોઽદ્ભુતધ્યેયો રુદ્રપ્રેમી સુશીતલઃ ॥ ૧૬॥

અન્તઃસ્પૃક્ ધનુઃસ્પૃક્ચૈવ ભરતાપૃષ્ટકૌશલઃ ।
આત્મસંસ્થો મનઃસંસ્થઃ સત્ત્વસંસ્થો રણસ્થિતઃ ॥ ૧૭॥

ઈર્ષ્યાહીનો મહાશક્તિઃ સૂર્યવંશી જનસ્તુતઃ ।
આસનસ્થો બાન્ધવસ્થઃ શ્રદ્ધાસ્થાનં ગુણસ્થિતઃ ॥ ૧૮॥

ઇન્દ્રમિત્રોઽશુભહરો માયાવિમૃગઘાતકઃ ।
અમોઘેષુઃ સ્વભાવજ્ઞો નામોચ્ચારણસંસ્મૃતઃ ॥ ૧૯॥

અરણ્યરુદનાક્રાન્તો બાષ્પસઙ્કુલલોચનઃ ।
અમોઘાશીર્વચોઽમન્દો વિદ્ધદ્વન્દ્વો વનેચરઃ ॥ ૨૦॥

ઇન્દ્રાદિદેવતાતોષઃ સંયમી વ્રતધારકઃ ।
અન્તર્યામી વિનષ્ટારિર્દમ્ભહીનો રવિદ્યુતિઃ ॥ ૨૧॥

કાકુત્સ્થો ગિરિગમ્ભીરસ્તાટકાપ્રાણકર્ષણઃ ।
કન્દમૂલાન્નસન્તુષ્ટો દણ્ડકારણ્યશોધનઃ ॥ ૨૨॥

કર્તવ્યદક્ષઃ સ્નેહાર્દ્રઃ સ્નેહકૃત્કામસુન્દરઃ ।
કૈકેયીલીનપ્રવૃત્તિર્નિવૃત્તિર્નામકીર્તિતઃ ॥ ૨૩॥

કબન્ધઘ્નો ભયત્રાણો ભરદ્વાજકૃતાદરઃ ।
કરુણઃ પુરુષશ્રેષ્ઠઃ પુરુષઃ પરમાર્થવિત્ ॥ ૨૪॥

કેવલઃ સુતસઙ્ગીતાકર્ષિતો ઋષિસઙ્ગતઃ ।

કાવ્યાત્મા નયવિન્માન્યો મુક્તાત્મા ગુરુવિક્રમઃ ॥ ૨૫॥

ક્રમજ્ઞઃ કર્મશાસ્ત્રજ્ઞઃ સમ્બન્ધજ્ઞઃ સુલક્ષઃ ।
કિષ્કિન્ધેશહિતાકાઙ્ક્ષી લઘુવાક્યવિશારદઃ ॥ ૨૬॥

કપિશ્રેષ્ઠસમાયુક્તઃ પ્રાચીનો વલ્કલાવૃતઃ ।
કાકપ્રેરિતબ્રહ્માસ્ત્રઃ સપ્તતાલવિભઞ્જનઃ ॥ ૨૭॥

કપટજ્ઞઃ કપિપ્રીતઃ કવિસ્ફૂર્તિપ્રદાયકઃ ।
કિંવદન્તીદ્વિધાવૃત્તિર્નિધારાદ્વિર્વિધિપ્રિયઃ ॥ ૨૮॥

કાલમિત્રઃ કાલકર્તા કાલદિગ્દર્શિતાન્તવિત્ ।
ક્રાન્તદર્શી વિનિષ્ક્રાન્તો નીતિશાસ્ત્રપુરઃસરઃ ॥ ૨૯॥

કુણ્ડલાલઙ્કૃતશ્રોત્રો ભ્રાન્તિહા ભ્રમનાશકઃ ।
કમલાયતાક્ષો નીરોગઃ સુબદ્ધાઙ્ગો મૃદુસ્વનઃ ॥ ૩૦॥

ક્રવ્યાદઘ્નો વદાન્યાત્મ સંશયાપન્નમાનસઃ ।
કૌસલ્યાક્રોડવિશ્રામઃ કાકપક્ષધરઃ શુભઃ ॥ ૩૧॥

ખલક્ષયોઽખિલશ્રેષ્ઠઃ પૃથુખ્યાતિપુરસ્કૃતઃ ।
ગુહકપ્રેમભાગ્દેવો માનવેશો મહીધરઃ ॥ ૩૨॥

ગૂઢાત્મા જગદાધારઃ કલત્રવિરહાતુરઃ ।
ગૂઢાચારો નરવ્યાઘ્રો બુધો બુદ્ધિપ્રચોદનઃ ॥ ૩૩॥

ગુણભૃદ્ગુણસઙ્ઘાતઃ સમાજોન્નતિકારણઃ ।
ગૃધ્રહૃદ્ગતસઙ્કલ્પો નલનીલાઙ્ગદપ્રિયઃ ॥ ૩૪॥

ગૃહસ્થો વિપિનસ્થાયી માર્ગસ્થો મુનિસઙ્ગતઃ ।
ગૂઢજત્રુર્વૃષસ્કઙ્ધો મહોદારઃ શમાસ્પદઃ ॥ ૩૫॥

ચારવૃત્તાન્તસન્દિષ્ટો દુરવસ્થાસહઃ સખા ।
ચતુર્દશસહસ્રઘ્નો નાનાસુરનિષૂદનઃ ॥ ૩૬॥

ચૈત્રેયશ્ચિત્રચરિતઃ ચમત્કારક્ષમોઽલઘુઃ ।
ચતુરો બાન્ધવો ભર્તા ગુરુરાત્મપ્રબોધનઃ ॥ ૩૭॥

જાનકીકાન્ત આનન્દો વાત્સલ્યબહુલઃ પિતા ।
જટાયુસેવિતઃ સૌમ્યો મુક્તિધામ પરન્તપઃ ॥ ૩૮॥

જનસઙ્ગ્રહકૃત્સૂક્ષ્મશ્ચરણાશ્રિતકોમલઃ ।
જનકાનન્દસઙ્કલ્પઃ સીતાપીરણયોત્સુકઃ ॥ ૩૯॥

તપસ્વી દણ્ડનાધારો દેવાસુરવિલક્ષણઃ ।
ત્રિબન્ધુર્વિજયાકાઙ્ક્ષી પ્રતિજ્ઞાપારગો મહાન્ ॥ ૪૦॥

ત્વરિતો દ્વેષહીનેચ્છઃ સ્વસ્થઃ સ્વાગતતત્પરઃ ।
જનનીજનસૌજન્યઃ પરિવારાગ્રણીર્ગુરુઃ ॥ ૪૧॥

તત્ત્વવિત્તત્ત્વસન્દેષ્ટા તત્ત્વાચારી વિચારવાન્ ।
તીક્ષ્ણબાણશ્ચાપપાણિઃ સીતાપાણિગ્રહી યુવા ॥ ૪૨॥

તીક્ષ્ણાશુગઃ સરિત્તીર્ણો લઙ્ઘિતોચ્ચમહીધરઃ ।
દેવતાસઙ્ગતોઽસઙ્ગો રમણીયો દયામયઃ ॥ ૪૩॥

દિવ્યો દેદીપ્યમાનાભો દારુણારિનિષૂદનઃ ।
દુર્ધર્ષો દક્ષિણો દક્ષો દીક્ષિતોઽમોઘવીર્યવાન્ ॥ ૪૪॥

દાતા દૂરગતાખ્યાતિર્નિયન્તા લોકસંશ્રયઃ ।
દુષ્કીર્તિશઙ્કિતો વીરો નિષ્પાપો દિવ્યદર્શનઃ ॥ ૪૫॥

દેહધારી બ્રહ્મવેત્તા વિજિગીષુર્ગુણાકરઃ ।
દૈત્યઘાતી બાણપાણિર્બ્રહ્મ્યાસ્ત્રાઢ્યો ગુણાન્વિતઃ ॥ ૪૬॥

દિવ્યાભરણલિપ્તાઙ્ગો દિવ્યમાલ્યસુપૂજિતઃ ।
દૈવજ્ઞો દેવતારાધ્યો દેવકાર્યસમુત્સુકઃ ॥ ૪૭॥

દૃઢપ્રતિજ્ઞો દીર્ઘાયુર્દુષ્ટદણ્ડનપણ્ડિતઃ ।
દણ્ડકારણ્યસઞ્ચારી ચતુર્દિગ્વિજયી જયઃ ॥ ૪૮॥

દિવ્યજન્મા ઇન્દ્રિયેશઃ સ્વલ્પસન્તુષ્ટમાનસઃ ।
દેવસમ્પૂજિતો રમ્યો દીનદુર્બલરક્ષકઃ ॥ ૪૯॥

દશાસ્યહનનોઽદૂરઃ સ્થાણુસદૃશનિશ્ચયઃ ।
દોષહા સેવકારામઃ સીતાસન્તાપનાશનઃ ॥ ૫૦॥

દૂષણઘ્નઃ ખરધ્વંસી સમગ્રનૃપનાયકઃ ।
દુર્ધરો દુર્લભો દીપ્તો દુર્દિનાહતવૈભવઃ ॥ ૫૧॥

દીનનાથો દિવ્યરથઃ સજ્જનાત્મમનોરથઃ ।
દિલીપકુલસન્દીપો રઘુવંશસુશોભનઃ ॥ ૫૨॥

દીર્ઘબાહુર્દૂરદર્શી વિચારી વિધિપણ્ડિતઃ ।
ધનુર્ધરો ધની દાન્તસ્તાપસો નિયતાત્મવાન્ ॥ ૫૩॥

ધર્મસેતુર્ધર્મમાર્ગઃ સેતુબન્ધનસાધનઃ ।
ધર્મોદ્ધારો મનોરૂપો મનોહારી મહાધનઃ ॥ ૫૪॥

ધ્યાતૃધ્યેયાત્મકો મધ્યો મોહલોભપ્રતિક્રિયઃ ।
ધામમુક્ પુરમુગ્વક્તા દેશત્યાગી મુનિવ્રતી ॥ ૫૫॥

ધ્યાનશક્તિર્ધ્યાનમૂર્તિર્ધ્યાતૃરૂપો વિધાયકઃ ।
ધર્માભિપ્રાયવિજ્ઞાની દૃઢો દુઃસ્વપ્નનાશનઃ ॥ ૫૬॥

ધુરન્ધરો ધરાભર્તા પ્રશસ્તઃ પુણ્યબાન્ધવઃ ।
નીલાભો નિશ્ચલો રાજા કૌસલ્યેયો રઘૂત્તમઃ ॥ ૫૭॥

નીલનીરજસઙ્કાશઃ કર્કશો વિષકર્ષણઃ ।
નિરન્તરઃ સમારાધ્યઃ સેનાધ્યક્ષઃ સનાતનઃ ॥ ૫૮॥

નિશાચરભયાવર્તો વર્તમાનસ્ત્રિકાલવિત્ ।
નીતિજ્ઞો રાજનીતિજ્ઞો ધર્મનીતિજ્ઞ આત્મવાન્ ॥ ૫૯॥

નાયકઃ સાયકોત્સારી વિપક્ષાસુવિકર્ષણઃ ।
નૌકાગામી કુશેશાયી તપોધામાર્તરક્ષણઃ ॥ ૬૦॥

નિઃસ્પૃહઃ સ્પૃહણીયશ્રીર્નિજાનન્દો વિતન્દ્રિતઃ ।
નિત્યોપાયો વનોપેતો ગુહકઃ શ્રેયસાં નિધિઃ ॥ ૬૧॥

નિષ્ઠાવાન્નિપુણો ધુર્યો ધૃતિમાનુત્તમસ્વરઃ ।
નાનાઋષિમખાહૂતો યજમાનો યશસ્કરઃ ॥ ૬૨॥

મૈથિલીદૂષિતાર્તાન્તઃકરણો વિબુધપ્રિયઃ ।
નિત્યાનિત્યવિવેકી સત્કાર્યસજ્જઃ સદુક્તિમાન્ ॥ ૬૩॥

પુરુષાર્થદર્શકો વાગ્મી હનુમત્સેવિતઃ પ્રભુઃ ।
પ્રૌઢપ્રભાવો ભાવજ્ઞો ભક્તાધીનો ઋષિપ્રિયઃ ॥ ૬૪॥

પાવનો રાજકાર્યજ્ઞો વસિષ્ઠાનન્દકારણઃ ।
પર્ણગેહી વિગૂઢાત્મા કૂટજ્ઞઃ કમલેક્ષણઃ ॥ ૬૫॥

પ્રિયાર્હઃ પ્રિયસઙ્કલ્પઃ પ્રિયામોદનપણ્ડિતઃ ।

પરદુઃખાર્તચેતા દુર્વ્યસનેઽચલનિશ્ચયઃ ॥ ૬૬॥

પ્રમાણઃ પ્રેમસંવેદ્યો મુનિમાનસચિન્તનઃ ।
પ્રીતિમાન્ ઋતવાન્ વિદ્વાન્ કીર્તિમાન્ યુગધારણઃ ॥ ૬૭॥

પ્રેરકશ્ચન્દ્રવચ્ચારુર્જાગૃતઃ સજ્જકાર્મુકઃ ।
પૂજ્યઃ પવિત્રઃ સર્વાત્મા પૂજનીયઃ પ્રિયંવદઃ ॥ ૬૮॥

પ્રાપ્યઃ પ્રાપ્તોઽનવદ્યઃ સ્વર્નિલયો નીલવિગ્રહી ।
પરતત્ત્વાર્થસન્મૂર્તિઃ સત્કૃતઃ કૃતવિદ્વરઃ ॥ ૬૯॥

પ્રસન્નઃ પ્રયતઃ પ્રીતઃ પ્રિયપ્રાયઃ પ્રતીક્ષિતઃ ।
પાપહા શક્રદત્તાસ્ત્રઃ શક્રદત્તરથસ્થિતઃ ॥ ૭૦॥

પ્રાતર્ધ્યેયઃ સદાભદ્રો ભયભઞ્જનકોવિદઃ ।
પુણ્યસ્મરણઃ સન્નદ્ધઃ પુણ્યપુષ્ટિપરાયણઃ ॥ ૭૧॥

પુત્રયુગ્મપરિસ્પૃષ્ટો વિશ્વાસઃ શાન્તિવર્ધનઃ ।
પરિચર્યાપરામર્શી ભૂમિજાપતિરીશ્વરઃ ॥ ૭૨॥

પાદુકાદોઽનુજપ્રેમી ઋજુનામાભયપ્રદઃ ।
પુત્રધર્મવિશેષજ્ઞઃ સમર્થઃ સઙ્ગરપ્રિયઃ ॥ ૭૩॥

પુષ્પવર્ષાવશુભ્રાઙ્ગો જયવાનમરસ્તુતઃ ।
પુણ્યશ્લોકઃ પ્રશાન્તાર્ચિશ્ચન્દનાઙ્ગવિલેપનઃ ॥ ૭૪॥

પૌરાનુરઞ્જનઃ શુદ્ધઃ સુગ્રીવકૃતસઙ્ગતિઃ ।
પાર્થિવઃ સ્વાર્થસન્યાસી સુવૃત્તઃ પરચિત્તવિત્ ॥

પુષ્પકારૂઢવૈદેહીસંલાપસ્નેહવર્ધનઃ ।
પિતૃમોદકરોઽરૂક્ષો નષ્ટરાક્ષસવલ્ગનઃ ॥ ૭૬॥

પ્રાવૃણ્મેઘસમોદારઃ શિશિરઃ શત્રુકાલનઃ ।
પૌરાનુગમનોઽવધ્યો વૈરિવિધ્વંસનવ્રતી ॥ ૭૭॥

પિનાકિમાનસાહ્લાદો વાલુકાલિઙ્ગપૂજકઃ ।
પુરસ્થો વિજનસ્થાયી હૃદયસ્થો ગિરિસ્થિતઃ ॥ ૭૮॥

પુણ્યસ્પર્શઃ સુખસ્પર્શઃ પદસંસ્પૃષ્ટપ્રસ્તરઃ ।
પ્રતિપન્નસમગ્રશ્રીઃ સત્પ્રપન્નઃ પ્રતાપવાન્ ॥ ૭૯॥

પ્રણિપાતપ્રસન્નાત્મા ચન્દનાદ્ભુતશીતલઃ ।
પુણ્યનામસ્મૃતો નિત્યો મનુજો દિવ્યતાં ગતઃ ॥ ૮૦॥

બન્ધચ્છેદી વનચ્છન્દઃ સ્વચ્છન્દશ્છાદનો ધ્રુવઃ ।
બન્ધુત્રયસમાયુક્તો હૃન્નિધાનો મનોમયઃ ॥ ૮૧॥

વિભીષણશરણ્યઃ શ્રીયુક્તઃ શ્રીવર્ધનઃ પરઃ ।
બન્ધુનિક્ષિપ્તરાજ્યસ્વઃ સીતામોચનધોરણી ॥ ૮૨॥

ભવ્યભાલઃ સમુન્નાસઃ કિરીટાઙ્કિતમસ્તકઃ ।
ભવાબ્ધિતરણો બોધો ધનમાનવિલક્ષણઃ ॥ ૮૩॥

ભૂરિભૃદ્ભવ્યસઙ્કલ્પો ભૂતેશાત્મા વિબોધનઃ ।
ભક્તચાતકમેઘાર્દ્રો મેધાવી વર્ધિતશ્રુતિઃ ॥ ૮૪॥

ભયનિષ્કાસનોઽજેયો નિર્જરાશાપ્રપૂરકઃ ।
ભવસારો ભાવસારો ભક્તસર્વસ્વરક્ષકઃ ॥ ૮૫॥

ભાર્ગવૌજાઃ સમુત્કર્ષો રાવણસ્વસૃમોહનઃ ।
ભરતન્યસ્તરાજ્યશ્રીર્જાનકીસુખસાગરઃ ॥ ૮૬॥

મિથિલેશ્વરજામાતા જાનકીહૃદયેશ્વરઃ ।
માતૃભક્તો હ્યનન્તશ્રીઃ પિતૃસન્દિષ્ટકર્મકૃત્॥ ૮૭॥

મર્યાદાપુરુષઃ શાન્તઃ શ્યામો નીરજલોચનઃ ।
મેઘવર્ણો વિશાલાક્ષઃ શરવર્ષાવભીષણઃ ॥ ૮૮॥

મન્ત્રવિદ્યાધિજાદિષ્ટો ગૌતમાશ્રમપાવનઃ ।
મધુરોઽમન્દગઃ સત્ત્વઃ સાત્ત્વિકો મૃદુલો બલી ॥ ૮૯॥

મન્દસ્મિતમુખોઽલુબ્ધો વિશ્રામઃ સુમનોહરઃ ।
માનવેન્દ્રઃ સભાસજ્જો ઘનગમ્ભીરગર્જનઃ ॥ ૯૦॥

મૈથિલીમોહનો માની ગર્વઘ્નઃ પુણ્યપોષણઃ ।
મધુજો મધુરાકારો મધુવાઙ્મધુરાનનઃ ॥ ૯૧॥

મહાકર્મા વિરાધઘ્નો વિઘ્નશાન્તિરરિન્દમઃ ।
મર્મસ્પર્શી નવોન્મેષઃ ક્ષત્રિયઃ પુરુષોત્તમઃ ॥ ૯૨॥

મારીચવઞ્ચિતો ભાર્યાપ્રિયકૃત્પ્રણયોત્કટઃ ।
મહાત્યાગી રથારૂઢઃ પદગામી બહુશ્રુતઃ ॥ ૯૩॥

મહાવેગો મહાવીર્યો વીરો માતલિસારથિઃ ।
મખત્રાતા સદાચારી હરકાર્મુકભઞ્જનઃ ॥ ૯૪॥

મહાપ્રયાસઃ પ્રામાણ્યગ્રાહી સર્વસ્વદાયકઃ ।
મુનિવિઘ્નાન્તકઃ શસ્ત્રી શાપસમ્ભ્રાન્તલોચનઃ ॥ ૯૫॥

મલહારી કલાવિજ્ઞો મનોજ્ઞઃ પરમાર્થવિત્ ।
મિતાહારી સહિષ્ણુર્ભૂપાલકઃ પરવીરહા ॥ ૯૬॥

માતૃસ્નેહી સુતસ્નેહી સ્નિગ્ધાઙ્ગઃ સ્નિગ્ધદર્શનઃ ।
માતૃપિતૃપદસ્પર્શી અશ્મસ્પર્શી મનોગતઃ ॥ ૯૭॥

મૃદુસ્પર્શ ઇષુસ્પર્શી સીતાસમ્મિતવિગ્રહઃ ।
માતૃપ્રમોદનો જપ્યો વનપ્રસ્થઃ પ્રગલ્ભધીઃ ॥ ૯૮॥

યજ્ઞસંરક્ષણઃ સાક્ષી આધારો વેદવિન્નૃપઃ ।
યોજનાચતુરઃ સ્વામી દીર્ઘાન્વેષી સુબાહુહા ॥ ૯૯॥

યુગેન્દ્રો ભારતાદર્શઃ સૂક્ષ્મદર્શી ઋજુસ્વનઃ ।
યદૃચ્છાલાભલબ્ધાશી મન્ત્રરશ્મિપ્રભાકરઃ ॥ ૧૦૦॥

યજ્ઞાહૂતનૃપવૃન્દો ઋક્ષવાનરસેવિતઃ ।
યજ્ઞદત્તો યજ્ઞકર્તા યજ્ઞવેત્તા યશોમયઃ ॥ ૧૦૧॥

યતેન્દ્રિયો યતી યુક્તો રાજયોગી હરપ્રિયઃ ।
રાઘવો રવિવંશાઢ્યો રામચન્દ્રોઽરિમર્દનઃ ॥ ૧૦૨॥

રુચિરશ્ચિરસન્ધેયઃ સઙ્ઘર્ષજ્ઞો નરેશ્વરઃ ।
રુચિરસ્મિતશોભાઢ્યો દૃઢોરસ્કો મહાભુજઃ ॥ ૧૦૩॥

રાજ્યહીનઃ પુરત્યાગી બાષ્પસઙ્કુલલોચનઃ ।
ઋષિસમ્માનિતઃ સીમાપારીણો રાજસત્તમઃ ॥ ૧૦૪॥

રામો દાશરથિઃ શ્રેયાન્ પરમાત્મસમો ભુવિ ।
લઙ્કેશક્ષોભણો ધન્યશ્ચેતોહારી સ્વયન્ધનઃ ॥ ૧૦૫॥

લાવણ્યખનિરાખ્યાતઃ પ્રમુખઃ ક્ષત્રરક્ષણઃ ।
લઙ્કાપતિભયોદ્રેકઃ સુપુત્રો વિમલાન્તરઃ ॥ ૧૦૬॥

વિવેકી કોમલઃ કાન્તઃ ક્ષમાવાન્ દુરિતાન્તકઃ ।

વનવાસી સુખત્યાગી સુખકૃત્સુન્દરો વશી ॥ ૧૦૭॥

વિરાગી ગૌરવો ધીરઃ શૂરો રાક્ષસઘાતકઃ ।
વર્ધિષ્ણુર્વિજયી પ્રાજ્ઞો રહસ્યજ્ઞો વિમર્શવિત્॥ ૧૦૮॥

વાલ્મીકિપ્રતિભાસ્રોતઃ સાધુકર્મા સતાં ગતિઃ ।
વિનયી ન્યાયવિજ્ઞાતા પ્રજારઞ્જનધર્મવિત્ ॥ ૧૦૯॥

વિમલો મતિમાન્નેતા નેત્રાનન્દપ્રદાયકઃ ।
વિનીતો વૃદ્ધસૌજન્યો વૃક્ષભિત્ ચેતસા ઋજુઃ ॥ ૧૧૦॥

વત્સલો મિત્રહૃન્મોદઃ સુગ્રીવહિતકૃદ્વિભુઃ ।
વાલિનિર્દલનોઽસહ્યો ઋક્ષસાહ્યો મહામતિઃ ॥ ૧૧૧॥

વૃક્ષાલિઙ્ગનલીલાવિન્મુનિમોક્ષપટુઃ સુધીઃ ।
વરેણ્યઃ પરમોદ્યોગો નિગ્રહી ચિરવિગ્રહી ॥ ૧૧૨॥

વાસવોપમસામર્થ્યો જ્યાસઙ્ઘાતોગ્રનિઃસ્વનઃ ।
વિશ્વામિત્રપરામૃષ્ટઃ પૂર્ણો બલસમાયુતઃ ॥ ૧૧૩॥

વૈદેહીપ્રાણસન્તોષઃ શરણાગતવત્સલઃ ।
વિનમ્રઃ સ્વાભિમાનાર્હઃ પર્ણશાલાસમાશ્રિતઃ ॥ ૧૧૪॥

વૃત્તગણ્ડઃ શુભ્રદન્તી સમભ્રૂદ્વયશોભિતઃ ।
વિકસત્પઙ્કજાભાસ્યઃ પ્રેમદૃષ્ટિઃ સુલોચનઃ ॥ ૧૧૫॥

વૈષ્ણવો નરશાર્દૂલો ભગવાન્ ભક્તરક્ષણઃ ।
વસિષ્ઠપ્રિયશિષ્યશ્ચિત્સ્વરૂપશ્ચેતનાત્મકઃ ॥ ૧૧૬॥

વિવિધાપત્પરાક્રાન્તો વાનરોત્કર્ષકારણઃ ।
વીતરાગી શર્મદાયી મુનિમન્તવ્યસાધનઃ ॥ ૧૧૭॥

વિરહી હરસઙ્કલ્પો હર્ષોત્ફુલ્લવરાનનઃ ।
વૃત્તિજ્ઞો વ્યવહારજ્ઞઃ ક્ષેમકારી પૃથુપ્રભઃ ॥ ૧૧૮॥

વિપ્રપ્રેમી વનક્રાન્તઃ ફલભુક્ ફલદાયકઃ ।
વિપન્મિત્રં મહામન્ત્રઃ શક્તિયુક્તો જટાધરઃ ॥ ૧૧૯॥

વ્યાયામવ્યાયતાકારો વિદાં વિશ્રામસમ્ભવઃ ।
વન્યમાનવકલ્યાણઃ કુલાચારવિચક્ષણઃ ॥ ૧૨૦॥

વિપક્ષોરઃપ્રહારજ્ઞશ્ચાપધારિબહૂકૃતઃ ।
વિપલ્લઙ્ઘી ઘનશ્યામો ઘોરકૃદ્રાક્ષસાસહઃ ॥ ૧૨૧॥

વામાઙ્કાશ્રયિણીસીતામુખદર્શનતત્પરઃ ।
વિવિધાશ્રમસમ્પૂજ્યઃ શરભઙ્ગકૃતાદરઃ ॥ ૧૨૨॥

વિષ્ણુચાપધરઃ ક્ષત્રો ધનુર્ધરશિરોમણિઃ ।
વનગામી પદત્યાગી પાદચારી વ્રતસ્થિતઃ ॥ ૧૨૩॥

વિજિતાશો મહાવીરો દાક્ષિણ્યનવનિર્ઝરઃ ।
વિષ્ણુતેજોંઽસસમ્ભૂતઃ સત્યપ્રેમી દૃઢવ્રતઃ ॥ ૧૨૪ ॥

વાનરારામદો નમ્રો મૃદુભાષી મહામનાઃ ।
શત્રુહા વિઘ્નહન્તા સલ્લોકસમ્માનતત્પરઃ ॥ ૧૨૫॥

શત્રુઘ્નાગ્રજનિઃ શ્રીમાન્ સાગરાદરપૂજકઃ ।
શોકકર્તા શોકહર્તા શીલવાન્ હૃદયઙ્ગમઃ ॥ ૧૨૬॥

શુભકૃચ્છુભસઙ્કલ્પઃ કૃતાન્તો દૃઢસઙ્ગરઃ ।
શોકહન્તા વિશેષાર્હઃ શેષસઙ્ગતજીવનઃ ॥ ૧૨૭॥ ।
શત્રુજિત્સર્વકલ્યાણો મોહજિત્સર્વમઙ્ગલઃ ।
શમ્બૂકવધકોઽભીષ્ટો યુગધર્માગ્રહી યમઃ ॥ ૧૨૮॥

શક્તિમાન્ રણમેધાવી શ્રેષ્ઠઃ સામર્થ્યસંયુતઃ ।
શિવસ્વઃ શિવચૈતન્યઃ શિવાત્મા શિવબોધનઃ ॥ ૧૨૯॥

શબરીભાવનામુગ્ધઃ સર્વમાર્દવસુન્દરઃ ।
શમી દમી સમાસીનઃ કર્મયોગી સુસાધકઃ ॥ ૧૩૦॥

શાકભુક્ ક્ષેપણાસ્ત્રજ્ઞો ન્યાયરૂપો નૃણાં વરઃ ।
શૂન્યાશ્રમઃ શૂન્યમનાઃ લતાપાદપપૃચ્છકઃ ॥ ૧૩૧॥

શાપોક્તિરહિતોદ્ધારો નિર્મલો નામપાવનઃ ।
શુદ્ધાન્તઃકરણઃ પ્રેષ્ઠો નિષ્કલઙ્કોઽવિકમ્પનઃ ॥ ૧૩૨॥

શ્રેયસ્કરઃ પૃથુસ્કન્ધો બન્ધનાસિઃ સુરાર્ચિતઃ ।
શ્રદ્ધેયઃ શીલસમ્પન્નઃ સુજનઃ સજ્જનાન્તિકઃ ॥ ૧૩૩॥

શ્રમિકઃ શ્રાન્તવૈદેહીવિશ્રામઃ શ્રુતિપારગઃ ।
શ્રદ્ધાલુર્નીતિસિદ્ધાન્તી સભ્યઃ સામાન્યવત્સલઃ ॥ ૧૩૪॥

સુમિત્રાસુતસેવાર્થી ભરતાદિષ્ટવૈભવઃ ।
સાધ્યઃ સ્વાધ્યાયવિજ્ઞેયઃ શબ્દપાલઃ પરાત્પરઃ ॥ ૧૩૫॥

સઞ્જીવનો જીવસખા ધનુર્વિદ્યાવિશારદઃ ।
સૂક્ષ્મબુદ્ધિર્મહાતેજાઃ અનાસક્તઃ પ્રિયાવહઃ ॥ ૧૩૬॥

સિદ્ધઃ સર્વાઙ્ગસમ્પૂર્ણઃ કારુણ્યાર્દ્રપયોનિધિઃ ।
સુશીલઃ શિવચિત્તજ્ઞઃ શિવધ્યેયઃ શિવાસ્પદઃ ॥ ૧૩૭॥

સમદર્શી ધનુર્ભઙ્ગી સંશયોચ્છેદનઃ શુચિઃ ।
સત્યવાદી કાર્યવાહશ્ચૈતન્યઃ સુસમાહિતઃ ॥ ૧૩૮॥

સન્મિત્રો વાયુપુત્રેશો વિભીષણકૃતાનતિઃ ।
સગુણઃ સર્વથાઽઽરામો નિર્દ્વન્દ્વઃ સત્યમાસ્થિતઃ ॥ ૧૩૯॥

સામકૃદ્દણ્ડવિદ્દણ્ડી કોદણ્ડી ચણ્ડવિક્રમઃ ।
સાધુક્ષેમો રણાવેશી રણકર્તા દયાર્ણવઃ ॥ ૧૪૦॥

સત્ત્વમૂર્તિઃ પરઞ્જ્યોતિઃ જ્યેષ્ઠપુત્રો નિરામયઃ ।
સ્વકીયાભ્યન્તરાવિષ્ટોઽવિકારી નભસન્દૃશઃ ॥ ૧૪૧॥

સરલઃ સારસર્વસ્વઃ સતાં સઙ્કલ્પસૌરભઃ ।
સુરસઙ્ઘસમુદ્ધર્તા ચક્રવર્તી મહીપતિઃ ॥ ૧૪૨॥

સુજ્ઞઃ સ્વભાવવિજ્ઞાની તિતિક્ષુઃ શત્રુતાપનઃ ।
સમાધિસ્થઃ શસ્ત્રસજ્જઃ પિત્રાજ્ઞાપાલનપ્રિયઃ ॥ ૧૪૩॥

સમકર્ણઃ સુવાક્યજ્ઞો ગન્ધરેખિતભાલકઃ ।
સ્કન્ધસ્થાપિતતૂણીરો ધનુર્ધારણધોરણી ॥ ૧૪૪॥

સર્વસિદ્ધિસમાવેશો વીરવેષો રિપુક્ષયઃ ।
સઙ્કલ્પસાધકોઽક્લિષ્ટો ઘોરાસુરવિમર્દનઃ ॥ ૧૪૫॥

સમુદ્રપારગો જેતા જિતક્રોધો જનપ્રિયઃ ।
સંસ્કૃતઃ સુષમઃ શ્યામઃ સમુત્ક્રાન્તઃ સદા શુચિઃ ॥ ૧૪૬॥

સદ્ધર્મપ્રેરકો ધર્મો ધર્મસંરક્ષણોત્સુકઃ ।
ભયનિષ્કાસને નઃ સ સમ્ભવેત્પુનરાત્મનિ ॥ ૧૪૭॥

॥ ઇતિ શ્રીઅનન્તસુત શ્રીદિવાકરવિરચિતં
શ્રીરામસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

From Vishnustutimanjari, Mahaperiaval Trust

The author Pandit Divakara Ghaisasaguruji has composed additional stotras available in the end of Brihatstotraratnakara, which was also compiled and edited by him. The book is published by Dhavale Prakashan, Mumbai and is different from others with same name.

Proofread by Psa Easwaran psaeaswaran at gmail.com

*Shriramasahasranamastotram*

pdf was typeset on April 2, 2020

Please send corrections to *sanskrit@cheerful.com*